योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ५०

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

तमथासौ तथा बुद्धिफलपल्लवशालिनम् ।

आनन्दमन्थरमनाः षुष्परूपाचलोपमम् ।। १

कदम्बं रोदसीस्तम्भमारुरोह वनस्थितम् ।

एकार्णवगतं शौरिर्वटवृक्षमिवोन्नतम् ।। २

तत्रासौ व्योमलग्नायाः शाखायाः प्रान्तपल्लवे ।

विवेश विगताशङ्कमेकाग्रं तप आस्थितः ।। ३

अथोपविश्य मृदुनि नवपल्लवविष्टरे ।

क्षणमालोकितास्तेन दिशः कौतुकचञ्चलम् ।। ४

सरिदेकावलीरम्याः शैलेन्द्रस्तनकुड्मलाः ।

निर्मलाकाशकबरा लोलनीलाम्बुदालकाः ।। ५

नीलपल्लववसनाः पुष्पपूरावतंसिकाः ।

गृहीतसागरापूर्णकलशाः पुरुभूषणाः ।। ६

धृतप्रफुल्लपद्मिन्यः सुगन्धिमुखमारुताः ।

नीलघुंघुमकाकल्यो निर्झरारावनूपुराः ।। ७

द्युमूर्धानो महीपादा वनालीरोमराजयः ।

जङ्गलोरुनितम्बिन्यश्चन्द्रार्ककृतकुण्डलाः ।। ८

शालिसंसारकेदाराश्चन्दनस्थालिकान्विताः ।

शिखरोरसिजालग्नहिमशुभ्राम्बुदांशुकाः ।। ९

महार्णवपयःपूरनवमण्डनदर्पणाः ।

ऋक्षौघघर्मपुलका भुवनान्तःपुरान्तराः ।। १०

आर्तवस्तनधारिण्यो लग्नसूर्यांशुकुङ्कुमाः ।

विचित्रकुसुमोपेताश्चन्द्रांशुसितचन्दनाः ।। ११

गगनगतलतादलोपविष्टः

प्रसृतवनावनिवारिवाहवेषाः ।

त्रिभुवनवनिता ददर्श हृष्टः

कुसुमनिरन्तरमण्डिता दशाशाः ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० स्थितिप्रकरणे दा० दाशूरादिगवलोकनं नाम पञ्चाशः सर्गः ।।

५० ।।